श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकसप्ततितमः सर्गः ॥

## अल्पैः सैनिकैः सह शत्रुघ्नस्यायोध्यां प्रति प्रस्थानं मार्गे वाल्मीक्याश्रमे श्रीरामचरितस्य गानं श्रुत्वा तेषां विस्मयः

ततो द्वादशमे वर्षे शत्रुघ्नो रामपालिताम्।
अयोध्यां चकमे गन्तुमल्पभृत्यबलानुगः॥ **7.71.1** ॥

ततो मन्त्रिपुरोगांश्च बलमुख्यान् निवर्त्य च।
जगाम हयमुख्येन रथानां च शतेन सः॥ **7.71.2** ॥

स गत्वा गणितान् वासान् सप्ताष्टौ रघुनन्दनः।
वाल्मीक्याश्रममागत्य वासं चक्रे महायशाः॥ **7.71.3** ॥

सोऽभिवाद्य ततः पादौ वाल्मीकेः पुरुषर्षभः।
पाद्यमर्घ्यं तथातिथ्यं जग्राह मुनिहस्ततः॥ **7.71.4** ॥

बहुरूपाः सुमधुराः कथास्तत्र सहस्रशः।
कथयामास स मुनिः शत्रुघ्नाय महात्मने॥ **7.71.5** ॥

उवाच च मुनिर्वाक्यं लवणस्य वधाश्रितम्।
सुदुष्करं कृतं कर्म लवणं निघ्नता त्वया॥ **7.71.6** ॥

बहवः पार्थिवाः सौम्य हताः सबलवाहनाः।
लवणेन महाबाहो युध्यमाना महाबलाः॥ **7.71.7** ॥

स त्वया निहतः पापो लीलया पुरुषर्षभ।
जगतश्च भयं तत्र प्रशान्तं तव तेजसा॥ **7.71.8** ॥

रावणस्य वधो घोरो यत्नेन महता कृतः।
इदं च सुमहत्कर्म त्वया कृतमयत्नतः॥ **7.71.9** ॥

प्रीतिश्चास्मिन् परा जाता देवानां लवणे हते।
भूतानां चैव सर्वेषां जगतश्च प्रियं कृतम्॥ **7.71.10** ॥

तच्च युद्धं मया दृष्टं यथावत् पुरुषर्षभ।
सभायां वासवस्याथ उपविष्टेन राघव॥ **7.71.11** ॥

ममापि परमा प्रीतिर्हृदि शत्रुघ्न वर्तते।
उपाघ्रास्यामि ते मूर्ध्नि स्नेहस्यैषा परा गतिः॥ **7.71.12** ॥

इत्युक्त्वा मूर्ध्नि शत्रुघ्नमुपाघ्राय महामतिः।
आतिथ्यमकरोत् तस्य ये च तस्य पदानुगाः॥ **7.71.13** ॥

स भुक्तवान् नरश्रेष्ठो गीतमाधुर्यमुत्तमम्।
शुश्राव रामचरितं तस्मिन् काले यथाक्रमम्॥ **7.71.14** ॥

तन्त्रीलयसमायुक्तं त्रिस्थानकरणान्वितम्।
संस्कृतं लक्षणोपेतं समतालसमन्वितम्॥ **7.71.15** ॥

शुश्राव रामचरितं तस्मिन् काले पुरा कृतम्।
तान्यक्षराणि सत्यानि यथावृत्तानि पूर्वशः॥ **7.71.16** ॥

श्रुत्वा पुरुषशार्दूलो विसंज्ञो बाष्पलोचनः।
स मुहूर्तमिवासंज्ञो विनिःश्वस्य मुहुर्मुहुः॥ **7.71.17** ॥

तस्मिन् गीते यथावृत्तं वर्तमानमिवाशृणोत्।
पदानुगाश्च ये राज्ञस्तां श्रुत्वा गीतिसम्पदम्॥ **7.71.18** ॥

अवाङ्मुखाश्च दीनाश्च ह्याश्चर्यमिति चाब्रुवन्।
परस्परं च ये तत्र सैनिकाः सम्बभाषिरे॥ **7.71.19** ॥

किमिदं क्व च वर्तामः किमेतत् स्वप्नदर्शनम्।
अर्थो यो नः पुरा दृष्टस्तमाश्रमपदे पुनः॥ **7.71.20** ॥

शृणुमः किमिदं स्वप्ने गीतबन्धनमुत्तमम्।
विस्मयं ते परं गत्वा शत्रुघ्नमिदमब्रुवन्॥ **7.71.21** ॥

साधु पृच्छ नरश्रेष्ठ वाल्मीकिं मुनिपुङ्गवम्।
शत्रुघ्नस्त्वब्रवीत् सर्वान् कौतूहलसमन्वितान्॥ **7.71.22** ॥

सैनिकानक्षमोऽस्माकं परिप्रष्टुमिहेदृशः।
आश्चर्याणि बहूनीह भवन्त्यस्याश्रमे मुनेः॥ **7.71.23** ॥

न तु कौतूहलाद् युक्तमन्वेष्टुं तं महामुनिम्।
एवं तद् वाक्यमुक्त्वा तु सैनिकान् रघुनन्दनः।
अभिवाद्य महर्षिं तं स्वं निवेशं ययौ तदा॥ **7.71.24** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकसप्ततितमः सर्गः॥